अथ वा प्रतिज्ञाशुद्ध्यशुद्धी अपेक्ष्य तया धर्माधर्मौ जन्येते ताभ्याञ्च जयपराजयौ सत्यासत्यप्रत्यभिज्ञाभिशस्ततुलारोहणक्लेशानिष्टफलत्वे नार्थतो विधिनिषेधात्। अभिशस्तः सत्यप्रतिज्ञो विजयकामस्तुलामारोहेदित्यसत्यप्रतिज्ञो न तुलामारोहेदिति स्मृतेश्च वचनात्। यद्वा तया देवतासन्निधिः क्रियते ताश्च कर्मानुरूपलिङ्गमभिव्यञ्जयन्ति"। तत्र च शक्तिपदार्थस्वरूपादिकमुक्तं यथा

"कस्तर्हि शक्तिपदार्थः कारणत्वं तच्च स्वव्याप्येतरसकलसंपत्तौ कार्य्याभावव्यापकाभावप्रतियोगित्वम्। अथ वा यत्र कार्य्याभावव्याप्यता इतराभावावच्छिन्ना तत्कारणबीजे अङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते इतरसमवधाने सति बीजादङ्कुरसत्त्वात्, किन्त्वितराभावेनावच्छिद्यते इतराभावावच्छिन्ना तत्कारणबीजे अङ्कुराभावव्याप्यता न बीजत्वेनावच्छिद्यते इतराभावे बीजस्याङ्कुराभावनियमात्। शिलाशकलेऽङ्कुराभावव्याप्यता शिलात्वेनैवावच्छिद्यते। यद्वा अन्यासमवधानावच्छिन्नकार्य्यानुत्पत्तिव्याप्यत्वं कारणत्वं, रासभादेः कार्य्याभावव्याप्यता अन्यासमवधानस्य वैयर्थ्यमानवच्छेदकत्वात्। अनन्यथासिद्धनियतपूर्ववर्त्तिजातीयत्वं वा तत्त्वम्। अन्यथासिद्धश्च त्रिधा येन सहैव यस्य यं प्रति पूर्ववर्त्तित्वमवगम्यते, यथा घटं प्रति दण्डरूपस्य,(१) अन्यं प्रति पूर्ववर्त्तित्वे ज्ञाते एव यं प्रति यस्य पूर्ववर्त्तित्वमवगम्यते यथा शब्दं प्रति पूर्ववर्त्तित्वे ज्ञात एव ज्ञानं प्रत्याकाशस्य(२)। अन्यत्र कॢप्तनियतपूर्ववर्त्तिन एव कार्य्यसम्भवे तत्सहभूतत्वम्(३) यथा गन्धवति गन्धोत्पादादौ गन्धं प्रति तत्प्रागभावस्य नियतपूर्ववर्त्तित्वकल्पनात् पाकजस्थले गन्धं प्रति रूपादिप्रागभावादीनामप्यन्यथासिद्धत्वम् एतत्त्रितयव्यतिरेके नियतपूर्ववर्त्तित्वं कारणत्वम्। यागापूर्वयोस्तु यागपूर्ववर्त्तित्वेऽवगते न त्वगम्यमाने यत्र जन्यस्य पूर्ववर्त्तित्वेऽवगते जनकस्य पूर्वभावोऽवगम्यते तत्र जन्येन जनकस्यान्यथासिद्धिः। यत्र च जनकस्य तथात्वेऽवगते जन्यस्य पूर्वभावावगतिस्तत्र तद्द्वारा तस्य जनकत्वमेव। दण्डसंयोगभ्रमणयोस्तु युगपदेव पूर्वभावित्वग्रहः। यस्यानन्तरोत्पत्तिकसकलसमवधाने सत्यपि यस्याभावात् कार्य्यं न जायते सति च जायते तज्जातीयं प्रति तदनन्यथासिद्धम्। अनन्यथासिद्धनियतपूर्ववर्त्तित्वं कारणत्वमित्यन्ये तन्न ईश्वरतद्बुद्ध्यादीनामसंग्रहात् तद्व्यतिरेकस्य तत्समवधानव्यतिरेकस्य वाऽभावात्। कार्य्यस्यान्यथानुपपद्यमानताव्यवस्थाप्यत्वं वाऽनन्यथासिद्धम्। नन्वेवमतिरिक्तशक्तौ साधकबाधकप्रमाणाभावान्नित्यं संशयः न च बाधकाभावस्य बाधकत्वं बाधकाभावस्य साधकत्वादिति चेन्न साधकाभावेन वह्न्यावन्यत्र सिध्यतीन्द्रियधर्माभावसाधने लाघवं बाधकाभावेनातीन्द्रियधर्मसाधने गौरवमिति साधकाभावात्तदभाव एव सिध्यतीति"।

"इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी। त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति" गोरक्षसं०। सत्त्वरजस्तमोगुणत्रयाधीने ईश्वरस्य क्रमेण ज्ञानेच्छाक्रियारूपे ७शक्तित्रये। "एषा त्रिशक्तिरुद्दिष्टा नरसिद्धान्तगामिनी। एषा श्वेता परा सृष्टिः सात्त्विकी ब्रह्मसंस्थिता। एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता। एषैव कृष्णा तमसि रौद्री देवी प्रकीर्त्तिता। परमात्मा यथा देव एकएव त्रिधार्पितः। प्रयोजनवशाच्छक्तिरेकैव त्रिविधाऽभवत्" वराहपु०। प्रकृतिशक्तिश्च ईश्वरस्य सृष्टिकर्त्तृत्वप्रवर्त्तिता "शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्" आनन्दल०। तन्त्रोक्ते ५ पीठाधिष्ठातृदेवताभेदे देवभेदे पीठशक्तयो भिन्नास्तन्त्रसारादौ उक्ताः। राज्ञां प्रभावोत्साहमन्त्रजाते ६ सामर्थ्ये च अमरः। ऊर्म्यां मेदि० ८ त्वष्ट्र्यां शब्दमा०।

वृत्तिभेदशक्तिश्च अर्थबोधानुकूलः पदपदार्थसम्बन्धः स च इदं पदममुमर्थं बोधयतु, अस्मात् शब्दादयमर्थो बोद्धव्य इत्येवंरूपः इच्छात्मकः सङ्केतः, घटादिपदार्थविशेष्यकघटादिपदजन्यबोधविषयताप्रकारकेच्छाविषयो वा। मीमांसकास्तु अभिधा नाम पदार्थान्तरं सङ्केतग्राह्यं शक्तिरित्याहुः। पदपदार्थयोः सम्बन्धान्तरं शक्तिरिति शाब्दिकाः। सा च शक्तिस्त्रिविधा रूढिर्योगः योगरूढिश्चेति तत्राद्या घटादिपदेषु, द्वितीया पाचकादिपदेषु, तृतीया पङ्कजादिपदेषु। प्राभाकरमते शक्तिर्द्विविधा अनुभाविका स्मारिका च तत्राद्या कार्य्यत्वान्विते, द्वितीया तु जातौ। तत्र गवादिपदानां जात्याकृतिविशिष्टव्यक्तौ शक्तिरिति नैयायिकाः। व्यक्तावेव शक्तिरिति नव्याः। जात्याकृतिव्यक्तिषु तिसृषु शक्तिरिति वैयाकरणाः। जातावेव शक्तिर्व्यक्तिभानं त्वाक्षेपादिति भाट्टादयः। जातौ व्यक्तौ चोभयत्र शक्तिः किन्तु जात्यंशे ज्ञाता व्यक्त्यंशे स्वरूपसती प्रत्यायिकेति। कार्य्यान्वितव्यक्तौ शक्तिरिति प्राभाकराः। धातोस्तु फलावच्छिन्नव्यापारे शक्तिरिति